हयोत्पत्तिस्थानसंख्यासाम्याच्च २सप्तसंख्यायाम् "काष्ठतुल्यवपुर्धृष्टो मिथ्याचारश्च निर्भयः । द्वादशाङ्गुलमेढ्रश्च दरिद्रस्तु हयो मत" इत्युक्तलक्षणपुरुषभेदे "पद्मिनी शशके तुष्टा हये तुष्टा च हस्तिनीति" रस० । अत्र प्रसङ्गात् अश्वानामङ्गविभागविशेषसंज्ञालक्षणादिकमुच्यते जयदत्तकृतादश्वशास्त्रात् सारांशः "अतिप्रसिद्धा जिह्वा तु तस्याः स्थूना भवेदधः । ऊर्द्ध्वं तालु भवेत्तस्यास्ततोऽग्रे दन्तपीठकम् । ततोदन्ताः समुद्दिष्टा ऊर्द्ध्वं दन्ता भवन्त्यधः । चिवुकं चाधरे भागे तेषां प्रोक्तं विचक्षणैः । चिवुकस्योपरिष्टात्तु अधरोष्ठः प्रकीर्त्तितः । चिवुकात्पार्श्वभागे तु हनुर्नामाभिधीयते । सृक्कद्वयं विजानीयात् वक्त्रपार्श्वगतं बुधः । उत्तरोष्ठं प्रयाणाख्यं तदूर्द्ध्वं प्रोथ उच्यते नासाच्छिद्रे तथा पार्श्वे प्रोथस्यैव व्यवस्थिते । नासाच्छिद्राक्षिमध्ये तु घोणाख्या समुदाहृता । घोणापार्श्वगतौ गण्डौ अक्षिकोरिके च ततःपरम् । नेत्रयोरुत्तरे भागे अश्रुपात उदाहृतः । कर्णान्ते चैव नेत्रान्तमपाङ्गं ब्रुवते बुधाः । कनीनिकाख्यो विज्ञेयो यश्च नासासमीपगः । सितासितौ च तन्मध्ये नेत्रयोर्मण्डलं हि तत् । प्रच्छादनं भवेद्वर्त्म चाक्षिकूटमतःपरम् । तस्मादूर्द्ध्वं भ्रुवोर्लेखा ललाटं च तदुत्तरम् । ऊर्द्ध्वं ललाटदेशात्तु केशान्तं च ततः श्रवः । ततः शिरो विजानीयात् श्रवादूर्द्ध्वगतं बुधः । शिरःपार्श्वगतौ कर्णौ तयोर्मूलं सकुन्तलम् । अपाङ्गाद्द्व्यङ्गुले चैव शङ्खं विद्याद्विचक्षणः । शङ्खकर्णान्तरे चैव कटाक्षं समुदाहृतम् । विदोमर्म्म विदुश्चैव कर्णस्याधः षडङ्गुले । घण्टाबन्धसमीपस्थो निगालः परिकीर्त्तितः । अधस्तले निगालस्य गलमाहुर्म्मनीषिणः । ततः कण्ठं विजानीयादधोभागे नतं बुधः । ग्रीवा लोकप्रसिद्धा तु तस्याश्चोपरि केशरः । ग्रीवास्कन्धान्तरे चैव वाहं प्राहुर्म्मनीषिणः । वाहस्योपरि यस्तु स्यात्ककसं ककुदं च तत् । ततः पृष्ठं विजानीयादासनं पृष्ठमध्यगम् । अंसके ककुदश्चैव निबन्धः परिकीर्त्तितः । स्यातामंसादधोबाहू तयोर्बाह्वग्रे षडङ्गुले । मन्दिरः पश्चिमोभागः कलापी जानुनोऽग्रिमः । जानुनश्चाधरे भागे जङ्घां विद्याद्विचक्षणः । जङ्घापार्श्वे कलां विद्यात् सन्ध्यं चैषिकसंज्ञकम् । अग्रतः पालिहस्तः स्यात् पश्चात्कूर्च उदाहृतः । किणस्तत्रैव मध्यस्थोह्यधोभागे च कुष्टकौ । खुरसन्धिं ततोविद्यादधोभागे ततः खुरम् । खुरस्य पार्श्वे पार्ष्णिः स्यादग्रभागे नखो भवेत् । खुरस्याधस्तलं चैव मण्डुकी तलमध्यगा । खुरमांसं विजानीयात् क्षीरकाख्यं विचक्षणः । हृदयात्परतः कुक्षी पार्श्वे तस्य विभागतः । जठरं पार्श्वमध्यस्थं तस्य नाभिश्च मध्यतः । रोमराजीं ततो विद्यान्मूत्रकोशमतःपरम् । आ कक्ष्याः पश्चिमे भागे पुटौ स्फिचौ च कीर्त्तितौ । पुच्छमूलं च वाहानां भाषते पुच्छमूलतः । तस्याधः कीर्त्तितः पायुः सीवनी च ततः परम् । मुष्कौ च कटिसन्धिं च ततोविद्यात्परं बुधः । अधस्तात्कटिसन्धेस्तु ऊरुसन्धिरुदाहृतः । सक्थिनी फलसन्धेस्तु ऊरू पादाभिधायके । ततः स्थूरं विजानीयात्तस्याधोमन्दिरं भवेत् । किणं चैव ततो विद्यान्मन्दिराख्ये सुसंस्थितम् । ततः परं विजानीयात् कालकूर्चं च कुष्टिकम् । खुरान्तसंज्ञं मण्डूकं ततो विद्याद्विचक्षणः । अग्रे जङ्घाद्वयं चैव वक्षो ग्रीवाशिरोमुखम् । पूर्व्वकायःसमुद्दिष्टः पृष्ठदेशस्तु मध्यमः । आ कटेः पश्चिमे भागे खुरान्तश्चापरं स्मृतम्" ।

तेषां लक्षणानि "अशुभैर्लक्षणैर्युक्ता हया न ग्रहणोचिताः । अतो लक्षणमेवादौ तेषां वक्ष्यामि देहजम् । ओष्ठयोः सृक्कणोश्चैव जिह्वायां दशनेषु च । वक्त्रे तालुनि नासायां गण्डयोर्नेत्रयोस्तथा । ललाटे मस्तके चैव केशे कर्णपुटे तथा । ग्रीवायां केशरे चापि स्कन्धे वक्षसि बाहुके । जङ्घायां जानुनोश्चाधः कूर्चे पादे तथैव च । पार्श्वयोः पृष्ठभागे च कुक्षौ कक्ष्यां सवालधौ । मेहने मुष्कयोश्चापि तथा चैवोरुकद्वये । आवर्त्ते च खुरे पुच्छे गतौ वर्णे स्वरे तथा । महादोषे त्यजेत्प्राज्ञश्छायायां गन्धसत्वयोः । प्रमाणस्यैव वाहानां लक्षणं यत्प्रतिष्ठितम् । शुभाशुभविवेकाय तद्विद्याद्बुद्धिमान्भिषक् । शालिहोत्रादिभिःसम्यक् त्रिकालज्ञानकोविदैः । आताम्रौ पूजितावोष्ठौ बलिहीनौ मृदुत्वचौ । सुप्रोथोत्तरसंस्थं च विपरीतं विवर्जयेत् । सृक्कणोर्म्मृदुता शस्ता जिह्वायां रक्तता तथा । अतश्चान्यद्धि दोषाय न त्वदीर्घा च सा शुभा । घना स्निग्धा सुबद्धा च समा दन्ताः सुशोभनाः । षट्संख्ये बन्धरे दृष्टे तेषु व्यङ्गुनसंभवः । आयतं तुङ्गघोणं च निर्म्मांसं प्रियदर्शनम् । सुबन्धं पूजितं वक्त्रं विपरीतं विगर्हितम् । तालु रक्तं प्रशस्तं च सुपुटे चैव नासिके । नातितनू समौ गण्डौ वाहानां कीर्त्तितौ शुभौ । अत्यन्तनिर्गते चैव सुबद्धे नैव चाविले । प्रशस्ते वाजिनां नेत्रे मद्याभे मलतारके । स्निग्धायते विशाले च श्रेष्टे मधुनिभाक्षिणी । कनकप्रतिसंकाशे शस्ते वाहस्य लोचने । सावर्त्तं च विशालं च अनिम्नं चैव वाजिनः । ललाटं पूजितं प्राहुर्म्मुनयः शास्त्र-